# <u>परशुराम अष्टविंशति नाम स्तोत्र</u>

**ऋषिरुवाच ।**

**यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ।**
**त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १ ॥**

**दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् ।**
**तस्य नामानि पुण्यानि वच्मि ते पुरुषर्षभ ॥ २ ॥**

**भूभारहरणार्थाय मायामानुषविग्रहः ।**
**जनार्दनांशसम्भूतः स्थित्युत्पत्त्यप्ययेश्वरः ॥ ३ ॥**

**भार्गवो जामदग्न्यश्च पित्राज्ञापरिपालकः ।**
**मातृप्राणप्रदो धीमान् क्षत्रियान्तकरः प्रभुः ॥ ४ ॥**

**रामः परशुहस्तश्च कार्तवीर्यमदापहः ।**
**रेणुकादुःखशोकघ्नो विशोकः शोकनाशनः ॥ ५ ॥**

**नवीननीरदश्यामो रक्तोत्पलविलोचनः ।**
**घोरो दण्डधरो धीरो ब्रह्मण्यो ब्राह्मणप्रियः ॥ ६ ॥**

**तपोधनो महेन्द्रादौ न्यस्तदण्डः प्रशान्तधीः ।**
**उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ ७ ॥**

**जन्ममृत्युजराव्याधिदुःखशोकभयातिगः ।**
**इत्यष्टाविंशतिर्नाम्नामुक्ता स्तोत्रात्मिका शुभा ॥ ८ ॥**

**अनया प्रीयतां देवो जामदग्न्यो महेश्वरः ।**
**नेदं स्तोत्रमशान्ताय नादान्तायातपस्विने ॥ ९ ॥**

**नावेदविदुषे वाच्यमशिष्याय खलाय च ।**
**नासूयकायानृजवे न चानिर्दिष्टकारिणे ॥ १० ॥**

**इदं प्रियाय पुत्राय शिष्यायानुगताय च ।**
**रहस्यधर्मो वक्तव्यो नान्यस्मै तु कदाचन ॥ ११ ॥**

**इति परशुरामाष्टाविंशति नाम स्तोत्र सम्पूर्णम् ।**